[1]पारकः-रिका, पारकः-रिका, [2]पुपूर्षकः-पिपरिषकः-पिपरीषकः-षिका, [3]पोपुरकः-रिका ;

परिता-परीता-त्री, पारयिता-त्री, पुपूर्षिता-पिपरिषिता-पिपरीषिता-त्री, पोपुरिता-त्री ;

[4]पिपुरत्-पिपुरतौ-पिपुरतः, पारयन्-न्ती, पुपूर्षन्-पिपरिषन्-पिपरीषन्-न्ती ; —

परिष्यन्-परीष्यन् न्ती-ती, पारयिष्यन्-न्ती-ती, पुपूर्षिष्यन्-पिपरिषिष्यन्-पिपरीषिष्यन्-न्ती-ती ; —

— पारयमाणः, — पोपूर्यमाणः ;

— पारयिष्यमाणः, — पोपुरिष्यमाणः ;

पूः-पुरौ-पुरः ; — — —

[5]पूर्तम्-पूर्तवान्, पारितः, पुपूर्षितः-पिपरिषितः-पिपरीषितः, पोपुरितः-तवान् ;

परः- [6]पूः[A] [7]पारयः, [8]पारयिष्णुः, पुपूर्षुः-पिपरिषुः-पिपरीषुः, पोपुरः ;

---

1. 'इत्वोत्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन' (वा. 7-1-102) इति वचनेन वृद्धिरत्र ज्ञेया। एवं तव्यदादिषु गुणोऽपि ज्ञेयः।

2. सन्नन्ते सर्वत्र, 'इको झल्' (1-2-9) इति सनः कित्त्वे, 'श्र्युकः क्किति' (7-2-11) इति प्राप्तमिण्निषेधं बाधित्वा, 'इट् सनि वा' (7-2-41) इतीड्विकल्पः। इट्पक्षे 'उदोष्ठ्यपूर्वस्य' (7-1-102) इत्युत्वे रपरत्वे, 'हलि च' (8-2-77) इति दीर्घे च रूपमेवम्। इडभावपक्षे 'वॄतो वा' (7-2-38) इति इटो दीर्घविकल्पे रूपद्वयम्। तत्र सनः कित्त्वाभावाद् गुणः, अभ्यासे इकारश्चेति ज्ञेयम्। आहत्य रूपत्रयमिति बोध्यम्।

3. यङन्ते सर्वत्र, उत्वरपरत्वाल्लोपयलोपेषु अभ्यासे, 'गुणो यङ्लुकोः' (7-4-82) इति गुणो ज्ञेयः।

4. शतरि, 'जुहोत्यादिभ्यः—' (2-4-75) इति शपः श्लौ, 'श्लौ' (6-1-10) इति द्विर्वचने, श्लोः शित्त्वेन सार्वधातुकत्वात् धातोरुत्वे रपरत्वे, 'अर्तिपिपर्त्योश्च' (7-4-77) इत्यभ्यासेकारः।

5. 'श्र्युकः क्किति' (7-2-11) इति इण्निषेधे, उत्वादिकम्।

6. तच्छीलादिषु कर्तृषु 'भ्राजभासधुर्विद्युतोर्जिपॄ—' (3-2-177) इति क्विपि उत्वादिषु प्रवृत्तेषु रेफस्य विसर्गे रूपम्।

7. ण्यन्तादस्मात् 'अनुपसर्गाल्लिम्पविन्दधारिपारि—'(3-1-138) इति कर्तरि शप्रत्यये तस्य शित्त्वेन सार्वधातुकत्वात् शपि, पररूपे, अयादेशे च रूपम्।

8. 'णेश्छन्दसि' (3-2-137) इति इष्णुच्प्रत्यये, 'अयामन्ताल्वाय्येत्न्विष्णुषु' (6-4-55) इति णेरयादेशः।

A. 'रथस्य तस्यां पुरि दत्तचक्षुः विद्वान् विदामास शनैर्न यातम्॥' शि.व 3.32.